पुरस्ताद्धानाः। प्रतिदिशमितराणियथासंख्यं। प्राणदानं। कपालांजनं। उद्वासनं। अन्वारब्धेवाश्विन
ग्रहणं। परिमार्जनं। सादनं। ग्रहानीसमाणावकाशवाचनं। भूर्भुवः स्वरितियजमानस्यजपः। ध्रुवगुप्तीकर
णं। द्वितीयंपरिप्लयणं। स्वर्वेवरोहनं। स्तोमायनपक्षेउपाकरणादि। यूपैकादशिनिपक्षेइतरेषांद्वेद्वेप
रिप्लयणे। अवटहोमांतपक्षेप्रत्येकमंजनादिद्विपरिवीतांतं। पक्षेअनुच्छित्योत्तरंवितष्टोत्सर्गः। उपा
पक्षे२ करणमथनयोर्नियमः। यथादैवतं नियोगः। स्तोमायनैर्यूपैप्रत्येकादशिन्यांगलगलनया। यूपैका
दशिन्यांप्रतिष्ठयं। प्रोक्षणादिप्रत्येकमधस्तादुपोक्षणांतमनेकपाशुकैर्होत्रनामग्रहणांतंकृत्वाइदं

होत्रादितिहोतृवरणं। ततोनेष्टाध्वर्योः। ततोध्वर्युर्यजमानांतं। यजमानवरणेस्मिन्यजमानइतिप्रयोगः। य
थाग्रहृतहोमः। पुनःपाशुकवरणादि। पश्वेकादशिन्यामाग्नेयसर्वकंनयनं। स्नौमायनेयुगपत्। अथ
स्वात्तृणमेकंसंज्ञपयान्वगमस्तामितिपशुद्वयेप्रैषः। संज्ञपयान्वगमन्नितिबहुपशोः। परिपशव्ययोर्नि
यमः। संज्ञप्तोपशुइतिपशुद्वयेप्रैषः। संज्ञप्ताःपशवइतिबहुपशोः। नियोजनीइयमसेपेमाहिर्भू
र्तंमाघ्वदाकऽरिति। बहुपशोर्माहिर्भूर्तमाघ्वदाकरितिनिष्टः। पत्नीमुदानयेत्यत्रपत्न्याःप्रतिपशुशो
धनं। ततएकैकस्यपश्चात्पशोर्निषेकांतं। अनेकपाशुकेउन्नानकरणादिमुत्तांजनांतमेकैकस्य।
अंतेतृणापासनं। वपोत्खेदनादिपरिवासनांतमेकैकस्य। श्टतेप्रचरेतिद्वयोः। श्टतांप्रचरेतिबहु
षु। वपाद्वयेप्रियाभ्यांधामाभ्यांप्रियंसदआसीदतमित्यासादनं। बहुषुप्रियेधर्मभिःप्रियंसदआसी १५
दतेतिहिरण्यनिधारणं। वपायांप्रस्थितशाह्ससहितःप्रैषः। वपाश्रपणीबहुत्वेस्वाहाकृताउर्ध्वनभसं
मारुतंगच्छतमितिप्रासनं। मार्जनांतेधिष्ण्योपस्थानं॥ ॥सदोग्निमर्शनं। द्वार्ययोरग्निमर्शनं। यजमा
नस्यसर्याग्निमंत्रणं। ऋत्विजांधिष्ण्यानांच। प्रियेधर्मभिःप्रियंसदआसीदतेतिसवनीयासादनं। उ

नरेवाजिनस्य सर्वाल्लंभनः। हुतवान्नात्मालंभनः। यजप्रैषावाज्यभागौ। प्रातःप्रातः सवस्येत्यनुवाचनं। जुह्वामु
पस्तारः पुरोडाशादीनां द्विर्द्विरवदानादि। प्रत्यापस्तीर्याभिर्धार्यैतुपस्तृतिवावद्यति पश्च पुरोडाशावत्
कृत्वोन्नयं। प्राशित्रादिभागग्रहणं होतृधिष्ण्येऽडानिधानं। द्विदेवत्ययागाः। ऐंद्रवायवादानं। अनु
वाचनं। प्रतिप्रस्थातुर्द्रोणकलशात् आदित्यपात्रेण ग्रहणं। परिमार्जनं। योन्यासादनं। आश्राव्य प्रै
षः। होमो यथावषट्कारं। प्रतिप्रस्थातुरनुहोमः उत्तरार्द्धे। आदित्यस्थाल्यां प्रतिप्रस्थातुः शेषासेकः। एवं
मैत्रावरुणे आश्विने च। प्रतिप्रस्थातुरुन्नीयमाने सिच्यते नैवापिधानं। उन्नेतुरुन्नीयमाने सोऽनुवाचनं।
उत्तरवेदिमपरेणानपस्तु चमसेषून्नयनं। प्रत्येकं शुक्रादुपस्तीर्य उन्नीयाभिघारणं। शुक्रामंथिप्रचा
रे शुक्रमध्वर्युरादत्ते मंथिनं प्रतिप्रस्थाता। प्रोक्षितां प्रोक्षितयोर्द्वयोः शकलयोरादानं। प्रोक्षितास्यामपिधा
नं। अपमार्जनमप्रोक्षितास्यामुदकोपस्पर्शनमुन्नयोः। निष्क्रमणं। अपरेणोत्तरवेदिमरत्निसंधानं उत्त
रवेदिश्रोण्योरविसृजतोर्निधानं। दक्षिणांसपदेशं प्रतिगमनमध्वर्योः। उत्तरं प्रतिप्रस्थातुः यूपमपरे
णारत्निसंधानं। प्रशाक्रौ पूर्वेण। अप्रोक्षितयोर्निरसनं। उदकोपस्पर्शनं। आहवनीयप्रोक्षितयोः प्रासनं।

अध्वर्यैरिवाछिन्नस्येति जपित्वा आश्राव्य प्रैषः । स्नपमन्नितौ वस्थितयोः प्रत्यङ्मुखयोर्होमः । प्रथममध्वर्या ।
तमनु प्रतिप्रस्थाता । देतेनं तरं चमसाध्वर्यवः । प्रतिवषट्कारं कृत्वा प्रैतु होतुश्चमसइति प्रैषः । एत्य
प्रतिप्रस्थातुः शुक्रपात्रे शेषावनयनं । तमध्वर्युर्होतृचमसे सवनयति । प्रशास्त्रब्राह्मणाच्छंसिपोतृनेष्ट्र
यीध्रचमसेष्ववनयनं । आश्राव्य प्रशास्त्रादि प्रैषणं । होतारं प्रत्यङ्मुखः प्रविशति । द्विदेवत्यभक्षणे ऐंद्रवायवमा
दायोपहवप्रार्थनं । उपहूतस्य प्रमुखस्य ढौकयित्वा भक्षणं । [illegible] प्रथममुत्तमाङ्क
गा ६ [illegible] ग्रालंभनं । शेषावनयनं । होत्रा नस्तिते पुनरध्वर्योर्भक्षणं । गात्रालंभनं । होतृच
मसे शेषावनयनं ततो होतुर्भक्षणं । शेषावनयनं । मैत्रावरुणादानं । उपहवप्रार्थनं । चक्षुषोर्ढौकयि
16 त्वा भक्षणं । गात्रालंभनं । शेषावनयनं ततो होतुर्भक्षणं । शेषावनयनं । आश्विनादानं । उपहवः । शिरः १६
परिहार्य श्रोत्रयोर्ढौकयित्वा भक्षणं । गात्रालंभनं । शेषावनयनं । होतुर्भक्षणं । शेषावनयनं । ऐंद्रवाय
वपुरोडाशप्राशनं । पयस्यां मैत्रावरुणे । आश्विने धाना । प्रतिप्रस्थातु तेषां दक्षिणस्य हविर्धानस्यो
त्तरे वर्त्मनि निधानं । इडासमर्पणं । चमसिनां चमसोद्यमनं । नसवनीयानां चतुर्धाकरणं सर्वत्र ॥ ॥

सोमन्नक्ष्येउपहूयन्नक्षयित्वागात्रालंजनं। होतृचमसमन्नक्षेअध्वर्युः प्रथमं। प्रतिप्रस्थातारंहोतारंच पृष्ट्वान्न
क्षयति। प्रतिप्रस्थानाध्वर्युहोतारंचपृष्ट्वान्नक्षयतीतिसर्वत्रसंबंधः। होताध्वर्युंप्रतिप्रस्थातारंच पृष्ट्वान्न
क्षयति। ब्रह्मचमसेहोताब्रह्माणंपृष्ट्वान्नक्षयति। ब्रह्माहोतारंपृष्ट्वान्नक्षयति। उद्गातृचमसेहोताउद्गाता
रंप्रस्तोतारंप्रतिहर्तारंच पृष्ट्वान्नक्षयति। पूर्ववषट्कारनिमित्तः। पश्चात्समाख्यानिमित्तः। तयोः पूर्वतरं
होमाभिषवनिमित्तोयत्रसंभवतितत्रनक्षः। उद्गाताहोतारंप्रस्तोतारंप्रतिहर्तारंच पृष्ट्वान्नक्षयति। प्र
स्तोताहोतारमुद्गातारंप्रतिहर्तारंचपृष्ट्वान्नक्षयति। प्रतिहर्ताहोतारमुद्गातारंप्रस्तोतारंचपृष्ट्वान्नक्ष
यति। यजमानचमसेहोतायजमानंपृष्ट्वान्नक्षयति। यजमानोहोतारंपृष्ट्वान्नक्षयति। पुनरस्कन्नीति
षुहोताप्रशास्तारमध्वर्युंच पृष्ट्वा। प्रशास्ताहोतारमध्वर्युंच पृष्ट्वाहोताब्राह्मणाछंसिनंअध्वर्युंचपृ
ष्ट्वा। ब्राह्मणाछंसीहोतारमध्वर्युंच पृष्ट्वा॥ होतापोतारमध्वर्युंच पृष्ट्वा। पोताहोतारमध्वर्युंच पृष्ट्वा। हो
तानेष्टारमध्वर्युंच पृष्ट्वा। नेष्टाहोतारमध्वर्युंच पृष्ट्वा। होताअग्नीधमध्वर्युंच पृष्ट्वा। आग्नीध्रोहोतार
मध्वर्युंच पृष्ट्वा। पुनः होतास्वकीयचमसेसमाख्यानिमित्तंअध्वर्युंप्रतिप्रस्थातारंच पृष्ट्वान्नक्षयति।

17

पुनरभ्युन्नीति ध्रुवमध्वर्योर्होमान्त्रिषवनिमित्तो न भक्षः। प्रशास्त्रादीनां च वषट्कारनिमित्तो भक्षः तत्राध्वर्युः
प्रशास्तृचमसे होतारं प्रशास्तारं च दृष्ट्वा भक्षयति। प्रशास्ता होतारमध्वर्युं च दृष्ट्वा स्वकीयचमसे भक्ष-
यति। वषट्कारसमाख्ययोस्तंत्रेण भक्षणं। एवमेव ब्राह्मणाच्छंसिपोतृनेष्ट्राग्नीधामध्वर्युणा सह भक्षणं।
अध्वर्युर्होतारं ब्राह्मणाच्छंसिनं च दृष्ट्वा भक्षयति। ब्राह्मणाच्छंसी होतारमध्वर्युं च दृष्ट्वा स्वकीयसम
से वषट्कारसमाख्ययोस्तंत्रेण भक्षयति। अध्वर्युर्होतारं पोतारं च दृष्ट्वा पोतृचमसे भक्षयति। पो
ता होतारमध्वर्युं च दृष्ट्वा स्वकीयचमसे वषट्कारसमाख्ययोस्तंत्रेण भक्षयति। अध्वर्युर्होतारं ने
ष्टारं च दृष्ट्वा नेष्टृचमसे भक्षयति। नेष्टा होतारमध्वर्युं च दृष्ट्वा स्वकीयचमसे वषट्कारसमाख्ययो
स्तंत्रेण भक्षयति। आग्नीध्रचमसे अध्वर्युर्होतारमाग्नीध्रं च दृष्ट्वा भक्षयति। अग्नीधो होतारमध्वर्युं च १७
दृष्ट्वा स्वकीयचमसे वषट्कारसमाख्ययोस्तंत्रेण भक्षयति॥ चमसाप्यायनं चमसिनां। दक्षिणस्य
हविर्धानस्य पश्चाद्दक्षं चमससनिधानं। पुरोडाशशकलमादाय समुपहूताः स्मइत्यक्षोन्त्थानं।
अच्छावाकाय समर्पयतः प्रैषः। उपोस्मान्निति अच्छावाके अध्वर्युर्होतारमाहोपहवमयं ब्राह्मणा

इच्छतेन८ होतरुपह्वयस्वेति। उपहूते उन्नीयमानायानुवाचनं। अच्छावाकचमसोन्नयनं द्रोणकलशा
त्। त्वपं वितिजपः। आश्राव्याच्छावाकयजेति प्रैषः। यागः। अत्र वा जपः। अध्वर्य्वच्छावाकयोरच्छावाकचम
३८ सैक्षणं। आप्यायनं। आग्नीध्रचमसात्सर्वमासादनं। हविर्यज्ञर्त्विजां आग्नीध्रे इडाभक्षणं। समस्य मा
र्जनं। भागपरिहरणं। पत्नीचान्यच्छालायां शालिस्थपादिभक्षयति। यजमानस्यापि यदृच्छया सवनी
यशेषभक्षणं॥ ऋतुग्रहप्रचारे द्रोणकलशादुपयामगृहीतोसि मधवे त्वेत्यध्वर्युप्रतिप्रस्थात्रोर्व्यत्यासे
नमंत्राः। ग्रहणं च। प्रथमोत्तमयोर्युगपद्ग्रहणं। परिमार्जनं। नमादनं। निष्क्राम तमध्वर्युप्रतिप्रस्था
तापात्रेण परिगृह्णाति। प्रविशंतं च। ऋतुना प्रेष्येति षड्दु प्रैषः। ऋतुभिरिति चतुर्षु। पात्रस्रुवे विपर्यासे
न च ग्रहणं। उत्तमयोर्ऋतुनेति। सशेषहोमः। पात्रस्रुवविपर्यासश्च। पक्षे सर्वेषां सशेषो होमः। अन्य
तरस्मिन् शेषकरणं। रिक्तेन प्रतिप्रस्थातुः ऐन्द्राग्नग्रहणं। परिमार्जनं। प्रदक्षिणावर्तनं॥ सादनं। भ
क्षाहरणं। ऋतुग्रहभक्षे अध्वर्युर्होत्रा सह भक्षयति होत्रादीन्यथाक्रमेणापृष्ट्वा। होताध्वर्य्वादीनपृष्ट्वा।
पोत्रा सह प्रतिप्रस्थाता नेष्ट्रा सहाध्वर्युः। आग्नीध्रेण सह प्रतिप्रस्थाता। ~~नेष्ट्रा सहाध्वर्युः। आग्नीध्रेण~~

सहप्रतिप्रस्थाता। पात्रमुखविपर्यासेन होत्रा सहाध्वर्युः। पोत्रा सह प्रतिप्रस्थाता। नेष्ट्रा सहाध्वर्युः। अ
छावाकेन सह प्रतिप्रस्थाता। पुनः पात्रमुखविपर्यासः। अध्वर्योर्होतुश्च भक्षणं। पुनः प्रतिप्रस्था
तुर्होतुश्च। प्रागुत्तमयोः सर्वहोमपक्षेऽयमेव भक्षः। सर्वपक्षेषु यथाक्रमं प्रश्नः। पात्रनिर्हरणं। हो
तुः पुरस्तान्ग्राऽऽसनं। अग्निकृतस्याह्वानप्रतिगरः। शास्त्रान्ते उक्थमिति कृत्वा प्रदक्षिणावर्त्तनं। सशास्त्रेषु
18 सर्वेष्वयमेव धर्मः। ऐन्द्राग्नादानं। आश्राव्योत्थाय यज सोमस्येति प्रैषः। वषट्कारानुवषट्कारयोर्होमः।
प्रदक्षिणावर्त्तनं। हूयमाने चमसिनां चमसकंपनं। ऐन्द्राग्नस्याध्वर्युहोतृभ्यां भक्षणं। चम
सिनामसाधारण्यादनुपहूयैव भक्षणं। चमसिनां चमसाप्यायनं। नाराशंसानां। ऐन्द्राग्नपात्रनिर्हरणं। १८
खरे सादनं॥ ॥वैश्वदेवग्रहणं शुक्रपात्रेण द्रोणकलशादन्वारब्धे वा। वाग्यमनं। परिमार्जनं। प्रद
क्षिणावर्त्तनं सादनं। शुक्रस्य प्रतत्यासेकः। द्रोणकलशापवित्रयोजनं। पशुपुरोडाशपूर्वकः सवनी
यनिर्वापो ग्नीधः। तत्र वाचस्पतिप्रैषः। पात्रासादनं। शूर्पाग्निहोत्रहवणि। अर्थवत्कपालानि। कृ
ष्णाजिनोलूखलमुसलं। पात्री चेदस्त्येव। शाखोपवेषः। उपसर्जनीपात्रं। पुरोडाशपात्र्योऽर्थवन्यः। श्य

पात्रग्रोहणांतेपुनःग्रोहणीनिःशेषकरणं।

तावदानमोषधं।स्रुपीदानादि आघ्रांतमुक्तं पयस्यावर्जनं संवेधपात्रसंमार्गः।पश्चुविश्राममनादिउ स्का
२५ ग्रसैणांतं।एकोद्वौवहवोवात्रिः प्रच्यावयतात्रिः प्रच्युतस्य हृदयमुत्तमंऊरुतादिन्येवमंतभैषः।हृदयंहृ
दयेहृदयानिवा।तृणान्वायहमुपस्पृश्यस्तोत्रोपाकरणं।शस्त्रप्रतिगरादिऐंद्राग्नवद्ग्रहणांतं।सर्वे
नक्षाश्चमसाइतिविशेषः।मार्जालीयेपात्रप्रक्षालनं।ग्रहपात्रस्यचमसानांच।उत्तरवेदिमपरेणचमसा
नांनिधानं।उकथ्यविग्रहणं।वाग्यमनं।परिमार्जनं।प्रदक्षिणावर्तनं।तूष्णींसादनं।प्रशास्तृचमसप्र
वर्कंचमसोन्नयनं।स्वस्थानेएवप्रशास्तृचमसः।तृणान्वायहोपस्पर्शनं।स्तोत्रोपाकरणं।शस्त्रप्रतिगरः।
शस्त्रांतेप्रदक्षिणवर्तनं।ग्रहोपादानं।आश्राव्योत्थायजसोमानामितिप्रैषः।वषट्कारानुवषट्कारयोर्हो
मः।चमसानांचप्रदक्षिणावर्तनं।ग्रहशेषस्यप्रशास्तृचमसेआसेकः।खरेपात्रस्थापनं।अध्वर्योःप्रशा
स्तृचमसेहोमान्निषवनिमित्तंभक्षणं।प्रशास्तृवषट्कारनिमित्तं।होतृचमसादिषुप्रशास्तृवषट्कारनिमि द्का ३
त्तोभक्षः।इतरेषांसमाख्यानिमित्तः।सर्वेयथाक्रमंवषट्कर्तारंदृष्ट्वाभक्षयंति।पुनःप्रशास्तृचमसेप्रशा
स्तारमध्वर्युंदृष्ट्वासमाख्याभक्षणं।पात्रप्रक्षालनं।उत्तरवेदौचमसवितननं।एवंप्रतिप्रस्थातुरुत्तरौ
निधाने।

होतृचमसेचसतीवरीः रुत्वा यजमानायस [illegible]

19 द्वौविग्रहौ। प्रथमेब्राह्मणाच्छंसी [illegible]। द्वितीयेछावाकः। यस्यविग्रहस्तस्यसर्वंचमसोन्नयनं। तत्रैवग्रह
शेषासेकः। नक्षतकः प्रशास्तृवत्। अछावाकविग्रहात्सर्वंसोमोपावहरणं। वसतीवर्येर्द्वासेकः। ए
कधनाईर्वचरित्वोन्नमेनचमसानांस्व [illegible] स्थानेस्थापनं॥ ॥सर्पणप्रैषः। सदोन्निमर्शनादिधिष्ण्योप
स्थानादिवास [illegible] र्पणं। होतृचमसः। दशापवित्रंपरिप्लवा॥ एतेषा [illegible] मन्निषर्वार्थानामीषांतरेणाहरणं।
पाणिप्रक्षालनं। हिरण्यबंधनंच्छ आदानं। वाग्यमनं। निग्राभ्यावाचनं। आत्मपन्निमानं। मितालंननं।
निग्राभ्यासेचनादित्रिपर्या [illegible] यास्त्रयोन्निषवाः। वितंवितावितंवितनूर्णाः पर्यायाः। अन्निषवादौमा
न्नेरितिप्रहरणं। शेषमिहाइहाइति। उत्तमान्निषवमध्यमेपर्यायेवृहद्दितिप्रयोगः। विशेषोपदेशात्। दू. रू. ५
सर्वत्रान्निषवादौप्रथमेपार्यायेमान्नेरितिप्रहरणं। द्रोणकलशप्रोहणं। पवित्रविनंननं। शुक्रप्रभृति १९
चतुर्णांग्रहणं। उक्थाद्द्वाग्रसर्वंमरुत्वतीयग्रहणं। षोडश्यपत्रचेदुक्थ्यादुत्तरोमरुत्वतीयोमुष्टिग्रहश्च।
समन्वारब्धनिष्क्रमणं। विप्रुड्ढोमः। अत्रवासमन्वारंभः। तृणादानंप्रातःसवनादुत्तरमुदगामनं। चा
त्वालेतृणप्रासनं। अन्यदुआन्तृणामयतश्च। सदसिपवमानोपाकरणं। स्तूयमानआसेकः। स्तोत्रांते

प्रैषः।तत्रपश्चन्नेहीत्यपक्रम्यात्रस्यस्थानेदक्षिणाउपावर्त्तयेति।सप्रवर्ग्येदधिधर्मायदध्याहरदक्षिणा
उपावर्त्तयेति।धिष्ण्यविहरणं।अनुपृष्ठ्यंबर्हिस्तरणं।दधिघर्मायदध्याहरणं।दक्षिणोपावर्त्तनं।पशु
पुरोडाशपूर्वकंसवनीयानांश्राणादानं।दधिधर्मपूर्वकमपरेइच्छंति।पृथगेवपश्चाद्दध्ययेरित्यपरे।
अग्निहोत्रहवण्याःप्रोक्षणं।संमार्गः।प्रतपनं।संप्रदायेतुअग्निहोत्रहवण्याःसंस्कारान्नेच्छंति।दधि
घर्मस्यश्राणादानं।आसादनं।आलंभनः।सदसःपुरस्ताद्ग्निहोत्रहवण्यांशाखापवित्रकरणं।उपस्तर
णं।दधिघर्मस्यद्विरवदानं।प्रत्युपस्तरणं।होतर्वदस्वेतिप्रैषः।वाद्यांतेश्रात७हविरित्कत्तिष्ठुन्नाह।आ
श्रावयइंद्रदधिधर्मस्ययजेतिप्रैषः।प्रतिवषट्कारंहोमः।धर्मर्त्विजांसयजमानानांउपहूयशेषभक्षणं।
प्राणभक्षोवा।चात्वालेमार्जनं।आसादनादिपशुपुरोडाशयागोत्तागपरिहरणांतः।सवनीयासादना
दि होतृधिष्ण्येनिधानांतं।उन्नीयमानप्रभृतिचमसनिधानांतं।उन्नयनंदशासु।यथास्तत्रंप्रैषः।नहिदे
वभक्षः।शाकलसंवादश्च।आग्नीध्रेहविर्यस्त्विंजांइडाभक्षणं।संस्कृत्याज्यंचतुर्गृहीतग्रहणं।तत्रवा
ससिवध्वाहिरण्यावधानं।समिधमाधायशाखाद्वार्यैहोमः।चित्रंदेवानामितिद्वितीयां।पूर्वसंस्कृतेनाज्ये

नआग्नीध्रीयेएकग्रहीतेनअग्नेनयेति। समिन्सर्वकोहोमः। अयन्नइतिसमिद्वर्जेद्वितीया। हिरण्यंगृहा
त्वाञ्चालांगुर्वेणनिष्ठतोयजमानस्यदक्षिणाभिमंत्रं। गवामतिक्रमणं। मंथ्यादीनांचनयनं। पत्नेसुब्र
ह्मण्याप्रैषः। आग्नीध्रांतंयजमानस्यदक्षिणानुगमनं। सदोनुगमनं। सदस्यानांप्रेक्षणं। आग्नीध्रगम
नं। उपविश्यास्मद्राणादिन्कक्ष्याअग्नीदक्षिणानांतेयोविभागः। सप्रतिगृह्यतामित्याग्नीध्रेहिरण्यादिदा
नं। आत्रेयायहिरण्यदानंयथोक्तं। ऋत्विग्भ्योदक्षिणादानं। प्रस्थापेभ्योदानमन्या। अप्रतिषिद्धानांचद ०
20 त्वानतःप्रतिहर्त्रेदक्षिणादानं। मरुत्वतीयादानं। अनुवाचनं। आश्राव्यइंद्रायमरुत्वतेप्रेष्येतिप्रैषः।
होमः। द्वितीयेनर्तुपात्रेणमरुत्वतीयग्रहणंपरिमार्जनं। प्रदक्षिणावर्त्तनं। सादनं। होत्रध्वर्युभ्यामितर
स्थापने।४ मरुत्वतीयस्तोत्रलक्षणं। पात्रप्रक्षालनं। होतुःपुरस्तात्प्राञ्जसनं। आहूतस्यप्रतिगरः। जनिष्ठाउग्रइत्येत
स्यांमदामोदैवेतिसकृत्प्रतिगरः। ऋतुपात्रेणप्रस्थातुःकुंठमरुत्वतीयग्रहणंपरिमार्जनं। सादनं। अ २०
ध्वर्योःशस्त्रांतेप्रदक्षिणावर्त्तनं। ग्रहोपादानं। आश्राव्योन्ध्राशायजसोमस्येतिप्रैषः। अध्वर्युमनुप्रति
प्रस्थातुःकुंठमरुत्वतीयहोमः। चमसानांकंपनं। प्रदक्षिणावर्त्तनं। होत्रध्वर्युभ्यांमहामरुत्वतीय न

स्रणं। प्रतिप्रस्थातोऽञ्जंठमरुत्वतीयमनुपहूय एकाकी भक्षयति। पात्रप्रक्षालनं। स्थापनं। शुक्रपात्रेणाद्रो
णकलशादन्वारब्धे वा माहेंद्रग्रहणं। वाग्यमनं। परिमार्जनं। प्रदक्षिणावर्त्तनं। सादनं। शुक्रस्य घृतव्यु
त्यासेचनं। तृणान्वाय ह्मुपस्त्रश्योपावर्त्तध्वमिति द्रष्टोपाकरणं। अग्निवोतारो निषुणुतेत्येवमादि प्रै
षः। शुद्धा निषवे अन्निषवार्थानामीषां तरेणाहरणं। पाणिप्रक्षालनं। हिरण्यबंधनं। अग्र्यादानं। वाग्य
मनं। उद्यमनं। द्वेष्यस्य मनसा निध्यानं। ऋजीषमिश्रस्यांशोः प्रहरणं। त्रिपर्यायो निषव आप्यायनांतः।
निग्राभ्यावाचनं। संनरण्याधवनीये वधायाध्रुयाहरणं। एवमपरौ द्वावभिषवौ। अदिणाचतुर्थ आधवनी
ये ऋजीषकरणं। अग्नीधः सवनीयनिर्वापः। तत्र वाचस्पतिप्रैषः। पात्रासादनं। वज्रवर्जं दशगणः। अ
र्थवतिश्चनः। पात्रीवेदस्येव। शाखोपवेषः। उपसर्जनीपात्रं। पंचबिला। वारुणार्थं पात्री। श्रृतावदानं। औ
षधं ब्रीहयो यवाश्च। चरोरुपकल्पनं। मंथस्य विरोलस्योपकल्पनं। श्रपाग्निहोत्रहवण्योरादानादि
ग्रहणं सादनांतं। सोम्यवारुणयोश्च ग्रहणं। प्रोक्षणीसंस्कारादि आज्यांतमुक्तं। श्रृतावदानस्य पात्र्योश्च
संमार्गः। संमार्जनप्रतिपत्तिः। आशिरविनयनं। माहेंद्रस्य स्तोत्रादि शस्त्रांते ग्रहोपादानं। आश्राव्याहो

२१ न्छ्रायजसोमस्येतिप्रैषः। प्रतिवषट्कारं होमः। चमसकंपनं। प्रदक्षिणावर्त्तनं। अध्वर्युर्होतृ ... मीमाहिद्रन
क्षणं। चमसिनिश्च चमसानां। सर्वजसाश्च चमसाः। मार्जालीयेपात्रप्रक्षालनं। उन्नरवे दोचमसविरलनं।
पूर्ववदुक्थ्याविग्रहणं। मंत्रमात्रे विशेषः। प्रागच्छावाकविग्रहाद् सतीवर्या ... सेकः। एकधनशेषस्य च। सर्वी
प्रशास्त्रः प्रस्थहीतिप्रैषः॥ ॥एहि यजमाने ... तिप्रैषः। अध्वर्यादीनां हविर्द्धानिप्रवेशनं। पश्चाश्चापरेण
द्वारेण। द्वारापिधानं। घृतन्त्वदुपरिसंस्रवे ग्रावादिस्यैग्रहणं। अपगृह्य पुनर्ग्रहणं। कुशांतर्द्धानं। दध्ना ग्रह ८
श्रपणं। उपांशुसवनेन मिश्रयणं। उपांशुसवनस्योन्नेत्रे समर्पणं। आसृज ग्राव्ण इतिप्रैषः। आधवनी
तुरे६ येचमसेवा सोमवतियात्रोवधायोन्नेवग्रावास्थापनं। ग्रहा ... पिधानं। द्वारापवरणं। अन्वारब्धस्य निष्क्र
मणं। अनुवाचनं प्रैषो होमः। प्रतिप्रस्थातुः शेषसमर्पणं। प्रशास्तः सर्पणप्रैषः। सर्पणं॥ ॥अधिष्ठ
नन्त्वतिपवित्रेनेष्टुराग्रयणासेकः। प्रतिप्रस्थातुश्च संस्रवयोः। उन्नेतुश्चोदंचनेन चमसेन वा आधवनी २१
यात्पवित्रे आसेकः। तत आग्रयणं समन्वारब्धनिष्क्रमणादिमाध्यंदिनवत्। दधिघर्मायदध्याहरदक्षिण
उपावर्त्तयेत्यस्य स्थाने पयो संवदस्वेतिप्रैषः। स्तूयमाने आधवनीयं घृतन्त्वत्या सिंचति पवित्रमंतर्द्धाय॥
तत एवं ... नेत्रमजीषकरणं। यथान्युप्तं विहरणं। अनुप्रस्थापं बर्हिस्तरणं। सवनीयानां प्रदानं। सोम्य

पश्चेषोडशिग्रहणं। ग्रहणां पूर्ववत्। उक्थ्यादिपुरस्थाप्य ... ग्रह ... पूतभृत्या शिरासेकः। पत्न्यास्सदवेक्षणं। ३

वारुणयोश्च। द्वितीयत्राभिचनुत्रासनादिमार्जनांतेविशेषः। यत्वाहृष्छादिपरस्परसंवादांतंप्रतिप्रस्थातुः।
अध्वर्योर्हृदयान्निधारणादिआलंभनांतं। अनेकपाशुकेअंतेसौविष्टकृदर्थमवदानग्रहणं। कृत्वावसांपा
त्रांतरेशेषावनयनं। हविःप्रस्थितंप्रेष्येतिविशेषः। समासिच्य। दिग्व्याघारणं। सवनीयासादनादिहोतृ
धिष्ण्येनिधानां। तंसवनीयस्विष्टकृदंतेसंचरान्मक्षणस्यनियमः। उन्नीयमानप्रैषः। चमसोन्नयनं। होतृच
मसंगृहीत्वाश्राव्यप्रैषोयथोक्तः। एवंचमसनिधानांते। शुष्कपिंडपितृयज्ञेपुरोडाशमात्रादानं। विनज्य नीविकर
स्वचमसेषुयजमानपितृभ्यःपिंडदानं। येषांचमसा नविद्यंतेतेयथासन्निहितेषुददाति। अत्रपितरइति
००जपः। आतमनादुदङासनं। आहृत्यामीमदंतेतिजपः। नीविविस्रंसनं। अंजलिकरणं। गृहान्नैजपः। सूत्र इति ८
दानं। इडाभक्षणं। समस्यमार्जनं। पवित्रप्रतिपत्तिः। भागपरिहरणं। सावित्रग्रहणं। परिमार्जनं। नसा
दनं। अनुवाचनं। प्रैषोयागः। तेनैवानक्षितेनमहावैश्वदेवग्रहणं प्रसन्नृतः। परिमार्जनं। प्रदक्षिणावर्त्ती
नंसादनं। होतुःपुरस्तात्प्राङासनं। आहूतस्यप्रतिगरः। एकयाचदशान्निश्चेतिशस्यमानेद्विदेवत्यानिप्रति
प्रस्थाताप्रक्षाल्यखरेकरोति। प्रथावायसैरितितिस्रःषुरुक्तु अर्द्धेषुमदामोदैवेतित्रिःप्रतिगरः। प्रदक्षिणा
वर्तनं। ग्रहोपादानं। आश्राव्योवक्ष्यत्रायजसोमस्येतिप्रैषः। यागः। चमसकंपनं। अध्वर्गणाहोत्रान्नैवे
...नदवेदं८।ा।३

पुनरूपरिश्याद्याज्यस्ययागः।३

ध्रुदेवनक्षणं। चमसिनः स्व[illegible] स्वचमसेषु नक्षयंति। पात्रप्रक्षालनं। स्वस्थानेस्थापनं। सोम्यासादनं। अ
२ सोमः। लंनः। आप्यायतश्चतुर्गृहीतग्रहणं। अग्निं घृतस्ययजेति प्रैषः। सोमं सोम्यस्ययजेति सौम्यस्ययागः। नक्ष
२२ तान्संगः। तत्र प्रैषो विष्णुं घृतस्ययजेति। अन्यतरतो वा आज्ययागः। तत्र प्रैषेण्वा विष्णुं घृतस्ययजेति विशेषः।
स्रुग्निधानं। सौम्ययागोत्तरकालं संचरान्नक्षणं केचिदिच्छंति तदयुक्तं। नहि संचरान्नक्षणं सोम्ययागांग (किंतु) स्विष्ट
रुद्रगो प्रकृतौ स्विष्टकृदंते संचरान्नक्षणं दृष्टं विकृतावपीह चोदकप्राप्तं सवनीयपुरोडाशस्विष्टकृदंते कर्तव्यं
एवं प्रकृतिवद्विकृतिः कर्तव्या भवति। नच सोम्यस्य स्विष्टकृदस्ति। येन सोम्योत्तरकालं संचरान्नक्षणं क्रिय
ते। तस्मात्सवनीयपुरोडाशस्विष्टकृदंते संचरान्नक्षणस्य नियमः। एवं च कृत्वा अनेनैव न्यायेन अतिरात्रे
आश्विनांते संचरान्नक्षणस्याभावः। आज्यमासिच्योद्गात्रे सोम्यप्रदानं। तच्चाज्यं लौकिकं। धिष्ण्यव्याघारणं।
xx पुनः पश्चादाग्नीध्रे येत्स्वमीमिच्छया। प्रतिप्रस्थातुः पात्नीवतग्रहणं। कुशांतर्धानं। प्रचरणीशेषेणाग्रपणं। २२
परिमार्जनं। आश्रावणाद्यध्वर्युप्रैषः। उत्तरार्द्धे होमः। आग्नीध्रस्य नेष्टुरुपस्थउपवेशनं। नेष्टाम्नांनक्षणं।
अग्नीधः पात्रप्रक्षालनं। खरेकरणं। होतृचमसादीनामुन्नयनं। [illegible] नेष्टुः पत्न्यानयनं। शिरसः श्रोणि

आग्नीध्रगमनं। उपहवप्रत्युपहवौ प्रैषाश्चाग्नीध्रीयएव। अग्नीन्नेष्टुरुपस्थमासीदेति प्रैषः। प्रभावयेत्युक्थ्या। द्दिपुा२

वनं। होतृचमसमुपस्पृश्य स्तोत्रोपाकरणं। नेष्टुः पत्नीमुद्गातारमीक्षस्वेति प्रैषः। प्रतिहिंकारमीक्षणं। प्रति
निधनमूर्वासेकः। एवं द्विरपरं। ईक्षिता वागमनं। शस्त्रप्रतिगरः। स्वादुः किलीयास्तु पक्षे महा। मोदेवेति।
एवानमिंद्रो मघवेति शस्यमाने होतृचमसे प्रतिप्रस्थातुर्ध्रुवावनयनं। यजमानस्य चमसे वैश्वानर
स्य पदेवनयनं। शस्त्रांते नात्र प्रदक्षिणावर्त्तनं अग्रहत्वात्। चमसादानं। उन्नेतरायज सोमानामिति प्रै
षः। चमसहोमः। नात्र प्रदक्षिणावर्त्तनं अग्रहत्वात्। नशस्त्रेषु पुनः सर्वेषु ग्रहेषु अस्ति। अध्वर्युहोतृ
भ्यां होतृचमसभक्षणं। होतुरन्येषु चमसेषु ब्रह्मचमसपूर्वकमाग्नीध्रचमसांतं वषट्कारनिमित्तं भक्ष
णं। इतरेषां समाख्यानिमित्तं भक्षणं। होतुः स्वकीयचमसे ध्वर्युपदृष्ट्वा समाख्याभक्षणं। पात्रप्रक्षालनं।
प्रशास्तः प्रसुहीति प्रैषादि सर्पणांतं। ततउल्मुकसमादि सो पक्षे षोडशियागः। तत्रचेत्रमसोन्नयनं।
स्तोत्रोपाकरणं। शस्त्रांते प्रदक्षिणावर्त्तनं। ग्रहोपादानं। आश्राव्योन्नेतरायज सोमानामिति प्रैषः। वषट्का
नुवषट्कारयोर्होमः। चमसानांच। प्रदक्षिणावर्त्तनं। ग्रहस्याध्वर्युहोतृभ्यां भक्षणमिंद्रश्च सम्राडिति। हो २२
तुः स्वकीयचमसपूर्वकं सर्वचमसेषु वषट्कारनिमित्तो भक्षः। इतरेषां समाख्याभक्षः। पुनः स्वकी

यचमसेहोतुःसमाख्याक्षणं। ।पात्रप्रक्षालनं। चात्वालदेशोस्थापनं। उक्थ्यसंस्थेयज्ञायज्ञियादनतरंउक्थ्य
विग्रहणानि ।तदंतेपाक्षिकःषोडशी। शुक्रषोडशिनिहिरण्योपस्थानाभावः। उल्मुकसमासा
दिधारानुयाजांतंपशुवत्। आग्नीध्रीयाद्धाहोत्रधिष्ण्यंगारस्थापनं। अनेकपाशुकेसर्वत्रउदग्रछेदहो
मः। पयस्यापक्षेस्वरुहोमः। सूर्पेकादशान्यांमध्यमवर्जंबहुसूपेदिवंवोढ्मोगछतुस्वर्जोतिःपृथिवीं
23 त्स्मनापृणतस्वाहेति। ऊहनादिधुरिनिधानांतंपाशुकंयथोक्तोवाजिनयागः॥ ॥विमुच्यस्रुचौ
द्रोणकलशेहारियोजनग्रहणंक्रत्वांतर्द्धानं। धानाग्निःश्रपणंपरिमार्जनं। मूर्द्धनिकृत्वात उन्नेतुरनु
वाचनादि। आश्राव्यप्रैषः। वषट्कारानुवषट्कारयोर्होमः। पक्षेसर्वस्य। असर्वहोमपक्षेउन्नेताहरणं।
उन्नेतुर्होतुर्भक्षणं। उत्तरवेदौसदसिवाधानाविलायः। धानावघ्राणं सदसिउत्तरवेदौवानिवा २२
पः। शाकलाधानं। पूर्णचमसावमर्शनं। तूष्णींमुखालंभनं। आग्नीध्रेदधिभक्षणंवेद्यालंभनः। जा
घन्यापत्नीसंयाजाः॥ अनेकपाशुकेसर्वाग्निः। इडादिसमिष्टयजुरंतं। पक्षेयोक्त्रविमोकः। नवसमिष्टय
जूंषि। आसंघोदुंबर्यैश्चात्वालेहरणं। सोमलिप्तस्यचा। कृष्णविषाणामेखलयोश्चात्वालेप्रासनं।

आसंद्याहरणादायोदकदेशगमनं। अर्धपथे पुनः सामप्रैषः। गानं। सर्वेषांनिधनं। २

प्रतिप्रस्थाता चत्वारोऽङ्के मेखलेति तूष्णीं। योक्त्रं च दीक्षाबंधनपक्षे। वाचनं। सामप्रैषः। गानं। सर्वेषांनि
धनं। उदकांते च अपो वक्रमयन्वाचयति। अग्न्यन्वाधानाद्य वन्त्यथेष्टिरेककपालेन। दृष्ययारू
जीषग्रहणं। स्विष्टकृति च सकृत्। प्रणीताविमोकांते रूजीषच्छंनजावनं विसर्ज्योपस्थानं। मज्ज
नं। कृष्णाजिनांतस्य च मज्जनं। पुत्रायतत्प्रदानं। यजमानपत्न्योः स्नानादि वरुणप्रघासवत्समिदा
धानांतं। सोमलिप्तवासनं। वाससा मंदानमंत्र। उन्नेतुरुन्नयनं। गच्छतामाप्युहीयाजयः।
यजमानस्य समिदाधानं। पत्नी च गार्हपत्ये तूष्णीं। व्रतग्रहणं। एकदृत्र बर्हिर्हिमादि समिदा
धानांतं। कृष्णाजिनमंके कृत्वा शालाद्वार्यमपरेण यजमानस्यासनं। संस्कृत्य यज्यं स्कवाहुतिः।
अपरे यजमानस्याहुतिमिच्छंति। स्कापत्ययोपदेशात्। कृष्णाजिननिधानं॥ ॥प्रायणीयावदु
दयनीया। पथ्यास्वस्तिश्चतुर्थी अतिप्रणीत एक इच्छंति। शालाद्वार्ये तु घोषणा। शालामुखीये
उदयनीययाचरंतीति श्रुतेः। अनुबंध्यायां वाचस्पतिप्रैषः। आहवनीयशालाद्वार्यदक्षिणाग्नीनां
परिस्तरणं। पात्रासादनादि वपामार्जनांते विशेषः। दक्षिणावर्जं सर्वपात्रवर्जं [illegible] नं।

न प्रथममिध्मप्रोक्षणं। आग्नीध्रउत्सवनं प्रत्युद्वनाज्यग्रहणानि। स्तरणमग्नीषोमीयवत्। स्रुपा स्तूप
उपाकरणमंथनयोर्नियमः। गो पशुः। नियोगप्रोक्षणे यथादैवतं। परिवास्यवपां गर्भेक्षणं प्रैषः। शमि
तुर्गर्भनिवेशनं। दर्शने स्थाल्यांचैवोष्मीषं चोपकल्पयितवा इति प्रैषः। मेधपक्षे स्थाल्यक्ष्मीषयोरुपकल्प
नं। प्रोक्षणीः संस्कृत्य मेधपक्षेत्र ऊष्मीस्थालीप्रोक्षणं। अवदानपक्षे मंत्रवत्प्रोक्षणं। श्रुतो स्वयो गर्भस
कयोः। वपामार्जनांते अनपेक्षमध्वर्युयजमानयोरागमनं। निरूढे तं गर्भमिति प्रैषः। निरूह्यमाणानि
मंत्रणं। यूपैकादशिनिपक्षे शालाद्वार्ये पत्नीस्रुपोच्छ्रयणं। तत्र वाचस्पतिप्रैषः। शालाद्वार्ये दक्षिणे
नोपवेशनं ब्रह्मणः। प्राजहितस्य परिस्तरणं। पात्रासादनं। अग्निहोत्रहवणी वज्रः। शम्याद्दृषदुप २४
लं। पवित्रछेदनानि पवित्रे। आज्यस्थाली ऊशामुष्टिः। अंतर्द्धानत्टणं अश्त्रिः। स्रुवो जुहूपभृतू। ध्रुवा
सन्नहनावछादनानि। कार्ष्मर्यमयाः परिधयः। ऐकव्यो विधृती होतृषदनमाज्यं अंतर्द्धानकटः। पूर्णपा
त्रं कर्मापवर्गाचेति उपकल्पनीयानि इध्माश्च वाजप्रस्तरोपसन्नद्धं बर्हिः स्रुपचतुष्टयं नाभिमात्रो स्रुपः।
आपः १ यवाः अवटकशाः अवदार्थं यमाज्यं स्रुपांजनीयं चैत्रिगुणरशना उपाकरणमंथनयोर्विकल्पः। द्वि

24

गुणरशनोमैत्रावरुणदंडः। पशुः असिः पवित्रकरणादि आज्यसादनांतं पशुवत्। वेदिकरणं तत्राज्या
धिश्रयणांते सन्नद्धेवपत्नीप्राकृतान्याज्यानि। नक्षत्रशाखावसाहोम हवनीच। सर्वालंकनः। आत्मालं
नः। उदकोपस्पर्शनं। अन्वादि असिप्रदानशामित्रवर्जं पर्यग्निकरणांतं। गृहीतएवमैत्रावरुणदंडः।
पशुसर्गः। व्रतग्रहणं। आज्यभागद्वयं। उपांशुयाजवत्वाध्वर्योयागः। स्रुग्निधानं। पवित्रप्रतिपत्तिः। उ
स्मुकसमासादिकर्मापवर्गांतमेष्टिकं। अनुयाजांते स्वरुहोमः। अनुबंध्यापुरोडाशोभागपरिहरणांतः।
पशुविशासनं। अवदानग्रहणं। गर्भस्यकंठेवांवकृत्यस्थाल्यांमेधस्रवणं। रुज्जुरेवावदानपक्षः। अव
दानान्यधिश्रित्यस्थाल्यांमेधाधिश्रयणं। गर्भमुष्मीषेणावेष्ट्यनिधानं। ततःशामि त्रनुशासनादि। मे
धस्यनत्रस्थानिधारानाव। प्राणदानंतूष्णीमस्ति। अवदानबहुत्वादस्तिएतोमेधस्थापनं। आलम्भा
वदानानि तूष्णींमेधस्यालंनः। वशावदानकालेप्रवाणप्यांमेधस्यद्विरवदानग्रहणं। उपस्तरणप्रत्युपस्तर
णेतस्यैवस्कतान्यंगश्च। अवदानान्यनुहोमोयस्यैतरति। अंगान्यङ्गनायस्यतंमात्रासमजीगममितिपुं
सि। ययोस्तोमात्रासमजीगममितिद्वयोः। येषांतान्मात्रेतिबहुषु। यस्यैतांमात्रासमजीगममितिस्त्रियाः।

ययोस्तेमात्रेतिद्वयोः।यासांताःमात्रेतिबहुषु।स्त्रीपुंसयोःपुंवत्।अविज्ञातेचपुंवत्।सोविष्टकृते
प्रतिप्रस्थातुरेवप्रचरणांसर्वमेधयहणस्तुपस्तीर्णेहिरन्निधारणं।स्विष्टकृतमन्तुहोमः।संचरान्प्र
सणादिस्वरुहोमांतंपाश्चुकं।व्रतहनादिसमिष्टयजुरंतेजुह्वास्तुपस्तीर्यांह्मीषवेष्टितस्यगर्भस्यारोपणं।
घ्नकपस्तरणं।तिष्ठतःशामित्रेहोमः॥अंगारैरभ्यूहनं।श्लावभृथश्चात्र।नाग्नीषोमीयसवनीययोः।वशा
25 नावउसा।उभयानावेपयस्या।महावेद्यामासादनांतं।बर्हिरसिस्रुचेत्वेतिप्रस्तरबर्हिषःप्रोक्षणं।आ
ज्यभागप्रभृतीडांतामेके।तत्रपदार्थानांलोपः।शेषप्रतिपत्तयश्चप्रवर्त्तंते।प्राजहितेसमारोप्यनिर्मथ्यो
दवसानीयाग्नेयःपंचकपालोहिरण्यदक्षिणाग्न्यन्वाधानादि।पश्चवद्वाहुतिः।पुनरुद्धृत्यसायमाहुतिः।
बर्हिशदीपनं।प्रलत्वमुक्तंयथास्त्रमिति।अथपयस्याआज्यभागप्रभृतीडांताचेत्करोति।तत्रशाखा २५
छेदनं।सन्न[illegible]नं।नोपवेषनिष्पत्तिः।पवित्रबंधनं।षड्वर्गस्यापाकरणंमित्रावरुणाभ्यांभागमितिविशे
षः।वाचस्पतिप्रैषः।प्रणीताप्रणयनं।अतिप्रणीतस्याहवनीयस्यैवपरिस्तरणं।पात्रासादनं।दशगण
वर्जंनिवियोगक्रमेण।अग्निहोत्रहवणीवज्रः।पवित्रछेदनानिपवित्रेआज्यस्थालीऊरामुष्टिः।दोहनच
कुंकुदाहननंना।व्रतेनशम्यानसाद्यते।नद[illegible]

परिधयः। विधृत्या वाज्यं। वाजिनभांडं होतृषदनं जुहूपभृत्। स्रुतावदानं। इडापात्री उपकल्पनीयानि ९

तुष्टयं योक्त्रं स्रुवः। स्रुवासन्नहनावच्छादनानि संमिद्द्वयं। अष्टादशेध्मकाष्ठानि वाइंधनार्थत्वात् प्रस्तर
वाग्यमनं।२ बर्हिः। आमिक्षार्थं दधि चेति। पवित्रकरणादि प्रोक्षणीसंस्कारान्तं । पात्रप्रोक्षणं प्रोक्षणी हू२
निधानान्तं वाग्विसर्गः। आज्यनिर्वापो वेदबंधः। उपस्थष्ठादिपरिक्षालनान्तो दोहः। आज्याधिश्रयणं।
नस्यैव पर्यग्निकरणं। उदकालम्भः। स्रुतेदध्यानयनं प्रोक्षणीप्रैषाज्यग्रहणान्तं। तत्र विशेषः। नस्कंदा घा४
दंचग्रहरणं। नपाण्योरवनेजनं। स्रुवादिसंमार्गः। स्रुतावदानानंतरं वाजिनभांडस्य च। स्रुवायामेव चतु
र्गृहीतग्रहणं। इध्मप्रोक्षणं न वेदेः। प्रस्तरबर्हिः प्रोक्षणं। बर्हिरसि स्रुचे त्वेति विशेषः। अपच्छेदाभावात्
तूष्णीं प्रस्तरग्रहणं। ब्रह्मणे प्रदानं। अन्वेर वच्छादनं। इध्मात्समिदादानादि स्रुक्सादनान्तं। तत्र वि
शेषः। नोल्मुकोद्वहनं। अघृतवत्योर्जुहूपभृतोर्घृतशब्दवर्जं मंत्रेणासादनं। स्रुवायां घृताच्यसि
ध्रुवा नाम्नेति। वाजिनभांडस्योपस्तरणं। तत्र स्थाल्यभिघारणमदत्वा वाजिननिषेकः। आमिक्षोद्वासनं।
सा२ प्राणदानं। वाजिनस्य च। आज्यस्थाल्योर्दनाद्याभ्यासलंबनान्तं॥ वाजिनस्योत्करे सादनं। व्रतग्रहणं। हो
तृप्रवेशनं। इध्मप्रक्षेपः। आहवनीयोपवाजनं। अग्निसंमार्गप्रैषो अग्निसंमार्गः॥ आश्राव्य हे [illegible]

संमार्गशेषोग्नि २

प्रस्तरांजलं।नीवेद्हरणं।तणग्रहणं।प्रस्तरप्रक्षेपः।स्रुहशा ... ।स्तरानुप्रहरणं।

।मेत्रिप्रकतो

आज्यभागप्रभृतीडांतं प्रकृतिवत्।भागचतुर्द्धाकरणवर्जं।प्राशित्रावदानं नवत्येव।समस्य मार्जनं।

पवित्रप्रतिपत्तिः।अग्निसंमार्गः परिधिमध्यमस्यांजलौ परिधंजनं।सूक्तवाकशेषः।प्रस्तरादानं।वि

धृतीप्रक्षेपः।[illegible]ः।आत्मालंभः।उदकोपस्पर्शनं।संवादशंयोर्वाकियोरभावः।

परिधिप्रक्षेपः।संस्रवाहुतिः।देशेनिधानं।अत्रवावाजिन[illegible]गः।वेदयोक्त्रयोर्विमोकः।आवेदेस्तर

णं।अन्यैरवछादनबर्हिर्होमः।प्रणीताविमोकः।व्रतविसर्गश्चेति॥ ॥अग्निहोत्रिकीपयस्यासमाप्त॥ ॥

ङि न्नमेतत्।ग्रंथसंख्या१४६५

१००

अत्रपदे क्रियागः

२६